श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### द्वाविंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## द्वाविंशः सर्गः

*रावणेन तस्याः कृते मासद्वयावधेः प्रदानं सीताकर्तृकं तस्य भर्त्सनं रावणस्य तां निर्भर्त्स्य राक्षसीनां नियन्त्रणे संस्थाप्य स्त्रीभिः सह स्वभवने गमनम्*

सीताया वचनं श्रुत्वा परुषं राक्षसेश्वरः।
प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनाम्॥ ५.२२.१ ॥

यथा यथा सान्त्वयिता वश्यः स्त्रीणां तथा तथा।
यथा यथा प्रियं वक्ता परिभूतस्तथा तथा॥ ५.२२.२ ॥

सन्नियच्छति मे क्रोधं त्वयि कामः समुत्थितः।
द्रवतो मार्गमासाद्य हयानिव सुसारथिः॥ ५.२२.३ ॥

वामः कामो मनुष्याणां यस्मिन् किल निबध्यते।
जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते॥ ५.२२.४ ॥

एतस्मात् कारणान्न त्वां घातयामि वरानने।
वधार्हामवमानार्हां मिथ्या प्रव्रजने रताम्॥ ५.२२.५ ॥

परुषाणि हि वाक्यानि यानि यानि ब्रवीषि माम्।
तेषु तेषु वधो युक्तस्तव मैथिलि दारुणः॥ ५.२२.६ ॥

एवमुक्त्वा तु वैदेहीं रावणो राक्षसाधिपः।
क्रोधसंरम्भसंयुक्तः सीतामुत्तरमब्रवीत्॥ ५.२२.७ ॥

द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः।
ततः शयनमारोह मम त्वं वरवर्णिनि॥ ५.२२.८ ॥

www.prapatti.com

द्वाभ्यामूर्ध्वं तु मासाभ्यां भर्तारं मामनिच्छतीम्।
मम त्वां प्रातराशार्थे सूदाश्छेत्स्यन्ति खण्डशः॥ ५.२२.९ ॥

तां भर्त्स्यमानां सम्प्रेक्ष्य राक्षसेन्द्रेण जानकीम्।
देवगन्धर्वकन्यास्ता विषेदुर्विकृतेक्षणाः॥ ५.२२.१० ॥

ओष्ठप्रकारैरपरा नेत्रैर्वक्त्रैस्तथापराः।
सीतामाश्वासयामासुस्तर्जितां तेन रक्षसा॥ ५.२२.११ ॥

ताभिराश्वासिता सीता रावणं राक्षसाधिपम्।
उवाचात्महितं वाक्यं वृत्तशौटीर्यगर्वितम्॥ ५.२२.१२ ॥

नूनं न ते जनः कश्चिदस्मिन्निःश्रेयसि स्थितः।
निवारयति यो न त्वां कर्मणोऽस्माद् विगर्हितात्॥ ५.२२.१३ ॥

मां हि धर्मात्मनः पत्नीं शचीमिव शचीपतेः।
त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन्मनसापि कः॥ ५.२२.१४ ॥

राक्षसाधम रामस्य भार्याममिततेजसः।
उक्तवानसि यत् पापं क्व गतस्तस्य मोक्ष्यसे॥ ५.२२.१५ ॥

यथा दृप्तश्च मातङ्गः शशश्च सहितौ वने।
तथा द्विरदवद् रामस्त्वं नीचः शशवत् स्मृतः॥ ५.२२.१६ ॥

स त्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे।
चक्षुषो विषये तस्य न यावदुपगच्छसि॥ ५.२२.१७ ॥

इमे ते नयने क्रूरे विकृते कृष्णपिङ्गले।
क्षितौ न पतिते कस्मान्मामनार्य निरीक्षतः॥ ५.२२.१८ ॥

तस्य धर्मात्मनः पत्नी स्नुषा दशरथस्य च।
कथं व्याहरतो मां ते न जिह्वा पाप शीर्यति॥ ५.२२.१९ ॥

असन्देशात्तु रामस्य तपसश्चानुपालनात्।
न त्वां कुर्मि दशग्रीव भस्म भस्मार्हतेजसा॥ ५.२२.२० ॥


www.prapatti.com

नापहर्तुमहं शक्या तस्य रामस्य धीमतः।
विधिस्तव वधार्थाय विहितो नात्र संशयः॥ ५.२२.२१ ॥

शूरेण धनदभ्रात्रा बलैः समुदितेन च।
अपोह्य रामं कस्माच्चिद् दारचौर्यं त्वया कृतम्॥ ५.२२.२२ ॥

सीताया वचनं श्रुत्वा रावणो राक्षसाधिपः।
विवृत्य नयने क्रूरे जानकीमन्ववैक्षत॥ ५.२२.२३ ॥

नीलजीमूतसङ्काशो महाभुजशिरोधरः।
सिंहसत्त्वगतिः श्रीमान् दीप्तजिह्वोग्रलोचनः॥ ५.२२.२४ ॥

चलाग्रमुकुटप्रांशुश्चित्रमाल्यानुलेपनः।
रक्तमाल्याम्बरधरस्तप्ताङ्गदविभूषणः॥ ५.२२.२५ ॥

श्रोणीसूत्रेण महता मेचकेन सुसंवृतः।
अमृतोत्पादने नद्धो भुजङ्गेनेव मन्दरः॥ ५.२२.२६ ॥

ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः।
शुशुभेऽचलसङ्काशः शृङ्गाभ्यामिव मन्दरः॥ ५.२२.२७ ॥

तरुणादित्यवर्णाभ्यां कुण्डलाभ्यां विभूषितः।
रक्तपल्लवपुष्पाभ्यामशोकाभ्यामिवाचलः॥ ५.२२.२८ ॥

स कल्पवृक्षप्रतिमो वसन्त इव मूर्तिमान्।
श्मशानचैत्यप्रतिमो भूषितोऽपि भयङ्करः॥ ५.२२.२९ ॥

अवेक्षमाणो वैदेहीं कोपसंरक्तलोचनः।
उवाच रावणः सीतां भुजङ्ग इव निःश्वसन्॥ ५.२२.३० ॥

अनयेनाभिसम्पन्नमर्थहीनमनुव्रते।
नाशयाम्यहमद्य त्वां सूर्यः सन्ध्यामिवौजसा॥ ५.२२.३१ ॥

इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः।
संददर्श ततः सर्वा राक्षसीर्घोरदर्शनाः॥ ५.२२.३२ ॥

एकाक्षीमेककर्णां च कर्णप्रावरणां तथा।
गोकर्णीं हस्तिकर्णीं च लम्बकर्णीमकर्णिकाम्॥ ५.२२.३३ ॥

हस्तिपद्यश्वपद्यौ च गोपदीं पादचूलिकाम्।
एकाक्षीमेकपादीं च पृथुपादीमपादिकाम्॥ ५.२२.३४ ॥

अतिमात्रशिरोग्रीवामतिमात्रकुचोदरीम्।
अतिमात्रास्यनेत्रां च दीर्घजिह्वानखामपि॥ ५.२२.३५ ॥

अनासिकां सिंहमुखीं गोमुखीं सूकरीमुखीम्।
यथा मद्वशगा सीता क्षिप्रं भवति जानकी॥ ५.२२.३६ ॥

तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य वा।
प्रतिलोमानुलोमैश्च सामदानादिभेदनैः॥ ५.२२.३७ ॥

आवर्जयत वैदेहीं दण्डस्योद्यमनेन च।
इति प्रतिसमादिश्य राक्षसेन्द्रः पुनः पुनः॥ ५.२२.३८ ॥

काममन्युपरीतात्मा जानकीं प्रति गर्जत।
उपगम्य ततः क्षिप्रं राक्षसी धान्यमालिनी॥ ५.२२.३९ ॥

परिष्वज्य दशग्रीवमिदं वचनमब्रवीत्।
मया क्रीड महाराज सीतया किं तवानया॥ ५.२२.४० ॥

विवर्णया कृपणया मानुष्या राक्षसेश्वर।
नूनमस्यां महाराज न देवा भोगसत्तमान्॥ ५.२२.४१ ॥

विदधत्यमरश्रेष्ठास्तव बाहुबलार्जितान्।
अकामां कामयानस्य शरीरमुपतप्यते॥ ५.२२.४२ ॥

इच्छतीं कामयानस्य प्रीतिर्भवति शोभना।
एवमुक्तस्तु राक्षस्या समुत्क्षिप्तस्ततो बली।
प्रहसन् मेघसङ्काशो राक्षसः स न्यवर्तत॥ ५.२२.४३ ॥



www.prapatti.com

प्रस्थितः स दशग्रीवः कम्पयन्निव मेदिनीम्।
ज्वलद्भास्करसङ्काशं प्रविवेश निवेशनम्॥ ५.२२.४४॥

देवगन्धर्वकन्याश्च नागकन्याश्च तास्ततः।
परिवार्य दशग्रीवं प्रविशुस्ता गृहोत्तमम्॥ ५.२२.४५॥

स मैथिलीं धर्मपरामवस्थितां
प्रवेपमानां परिभर्त्स्य रावणः।
विहाय सीतां मदनेन मोहितः
स्वमेव वेश्म प्रविवेश रावणः॥ ५.२२.४६॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वाविंशः सर्गः॥

www.prapatti.com